अथ बोधरहस्यम्

सन्तप्त धन्य संन्यासिन् गुरुभक्त गतागतात् । मुक्त्या आत्माप्तये तत्त्व-जडचैतन्यविद्भव ।।१।।
स्वान्याज्ञं जडमन्या चिन्नामरूपात्मकं जडम् । रोमत्वङ्मांसनाड्यस्थि भुवोऽद्भ्यो मूत्ररेतसी ।।२।।
स्वेदोऽस्त्रलालेग्नेः क्षुत्तृण्-निद्रा तन्द्रा रतिर्गतिः । लौल्यं निरोधः प्रसाराकुञ्चने मरुतोऽथ खात् ।।३।।
कामक्रुड्लोभमोहाभीस्-तदाढ्येयं जडा तनुः । वर्णाश्रमादिद्वन्द्वादि-संबन्धादिपरो भवान् ।।४।।
यन्निर्विकल्पं स्फुरति तदन्तःकरणं मनः । तत्सङ्कल्पविकल्पाभ्यां तत्तु धीर्निश्चयात्मकम् ।।५।।
अनुसन्धानकं चित्तमहङ्कारस्त्वहङ्कृतिः । व्यानाधार्याद्यं श्रुतेस्तु शब्दभुग्वक्ति वाक्सखम् ।।६।।
समानाधारि त्वचान्यत् स्पर्श्याश्यादातृ दातृ च । उदानाधारा धीर्नेत्राद् रूपभुक्सगमागमा ।।७।।

श्रीगणेशाय नमः।। अथ बोधाख्यं द्वितीयं रहस्यम्।। '*कश्चिद्धीरः प्रत्यगात्मानम्* ' इत्युक्तं प्रदर्श्य '*प्रोक्तान्येनैव सुज्ञानाय* ' इति श्रुतिहार्दं दर्शयितुं गुरुशिष्यसंवादरूपं बोधाख्यं रहस्यं कथयति। कश्चित्संस्कृतो ब्राह्मणोऽधीतवेदः कृतविहितगार्हस्थ्यकर्मापास्तकिल्बिष उपास्तपरमेश्वरोऽपि दैवात्तापत्रयसंतप्तः सन् विरक्त्या श्रीगुरुमुपससाद। तं च तादृशं प्रणतं प्रेक्ष्य कृपालुर्भगवान्श्रीगुरुः पृच्छति संतप्तेति। तापत्रयैः **सम्यक् तप्त धन्य** सुकृतिन् निर्विण्णत्वात्सद्गुरुलाभाच्च पूर्वमनुष्ठितनिष्कामकर्मफलोदयस्तवाधुना जात इति धन्येति संबुद्ध्या ज्ञाप्यते। तादृशस्यात्मविद्यायामधिकारत्वद्योतनाय पुनर्द्वे संबोधने **संन्यासिन्** श्रवणार्थं कृतश्रवणप्रतिबंधककर्मसंन्यास। **गुरुभक्त** हे शिष्य आत्मप्राप्तिरूपायै **मुक्त्यै** त्वं **तत्त्वा**नि सांख्योक्तानि **जडं** अनात्मरूपं **चैतन्यं** स्वात्मरूपं चैतानि वेत्तीति तथा **भव**।।१।। किं जडं किं चैतन्यमित्यत आह **स्वं अन्यं** च न जानातीति तथा त**ज्जडं** ततो**ऽन्या** स्वमात्मानं परं च जानाति सा **चित्** चैतन्यम्। एवं सामान्यत उक्त्वा विशेषत आह **नामरूपात्मकं जडं** अर्थान्नामरूपातीतं चैतन्यं १। तर्हि अचेतनोऽयं देहः कुतो नामरूपात्मभाक्, जडत्वात् इति कथयितुं तस्य पाञ्चभौतिकत्वं दर्शयति। **भुवः** सकाशात् **रोमा**दिपञ्च ५, **अद्भ्यः** सकाशा**न्मूत्रा**दिपञ्च, **अस्त्रं** रक्तं १०, **अग्नेः** सकाशात् **क्षुदा**दिपञ्च, **रति**र्मैथुनं मतान्तरं कान्तिः १५, **मरुतो** वायोः **गत्या**दि पञ्च २०, **अथ खा**दाकाशात्।।२।।३।। **कामा**दि पञ्च **क्रुट्** क्रोधः २५, **तै**रुक्तैर्भौतिकांशै**राढ्या** युक्ता पञ्चविंशत्या रचितेयं दृश्या स्थूलाख्या **तनुर्जडा** अस्यामेव **वर्णाश्रमाद**यः सुखदुःखादि**द्वन्द्वानि** पुत्रपित्रादयः **संबंधा**श्च **भवां**स्तु देहद्रष्टा त्वमेव वर्णाश्रमादिदेहधर्मेभ्यः **परः**।।४।। ननु तर्हि सुखदुःखाद्यनुभवः कथं अंतः-करणतादात्म्यातदन्तःकरणस्य च स्थूलदेहतादात्म्यापन्नत्वात्परंपरया सुखादिभ्रान्तिरेव साक्षिण इति वक्तुं सवृत्तिकमंतःकरणं निर्दिशति सार्धेन। **यत्तू**ष्णींभूतावस्थायां समाधौ च **निर्वि-कल्पं** यथातथा **स्फुरति तदंतःकरणं तदे**व जाग्रदादौ **संकल्पविकल्पाभ्या**मुपलक्षितं **मनः**संज्ञकं भवति **तदे**व **निश्चयात्मकं धी**र्बुद्धिरुच्यते।।५।। तदेवा**नुसंधानकं चित्त**मुच्यते तदेवा**हमि**ति यदा मनुते तदा**ऽहंकार** इति। इदं भूतसत्त्वकार्यं अन्यैः सात्त्विकैर्भूतकार्यैर्ज्ञानेन्द्रियै राजसैः कर्मेन्द्रियैः प्राणैश्च सहितं सत् चेतनस्य तव सान्निध्यात्स्वयं जडमपि चेतन-वत्प्रतीयते व्यवहरति च। तद्यथा **आद्य**मंतःकरणं व्यानाधारोऽस्यास्तीति **व्यानाधारि श्रुतेः** श्रवणद्वारा नानावर्णस्वरभेदभिन्नान् **शब्दान् भु**नक्तीति तथा **वाक्सखं** वागीन्द्रियप्रवर्तकं च।।६।। **समानाधारि** मन**स्त्वचा स्पर्शे**च्छु हस्ताभ्यां **आदातृ दातृ च उदानाधारा** बुद्धि**र्नेत्रे**ण **रूपभुक्** पादाभ्यां च **सगमागमा**।।७।। **प्राण**युक्तं **चित्तं जिह्वया रसभुक्** उप-

जिह्वया प्राणवच्चित्तं रसभुग्रतिमूत्रकृत् । सापानाहङ्कृतिर्घ्राणाद् गन्धभुग्विड्विसर्गकृत् ।।८।।

कर्मज्ञानेन्द्रियैः पुण्य-पापयोः सुखदुःखयोः । भौतिके पञ्चके कर्तृ-भोक्तृत्वे द्वन्द्वतापि च ।।९।।

तल्लिङ्गदेहतादात्म्यात् कर्तृत्वादि वृथार्जितम् । हेतुदेहपरस्वात्म-ज्ञानान्मुक्तिर्ध्रुवाऽचिरात् ।।१०।।

स्वदिदृक्ष्वरराज्ञान-हेतुसाक्षी परो भवान् । निराकारस्वात्मबुद्धि-महाकारणसाक्ष्यपि ।।११।।

स्थाणुरन्तर्बहिर्भास्वानात्मारामो निराकृतिः । चतुर्देहपरः साक्षी प्रत्यगीशोऽसि विद्ध्यदः ।।१२।।

अन्नासुहृद्ध्यहङ्कार-मयतादात्म्यतो भ्रमः । स्थूलः पञ्चीकृतैर्भूतैः सूक्ष्मः कर्मेन्द्रियासुभिः ।।१३।।

धीन्द्रियैर्हेतुर्महांश्च तद्विदात्मन्यथोद्धृते । अन्वयव्यतिरेकाभ्यां परं ब्रह्मैव शिष्यते ।।१४।।

भानं स्वप्नेऽस्योर्वभानेऽन्वयः प्राग्विस्मृतिः परः । लिङ्गाभानेऽन्वयः स्वाप-भानं प्राग्विस्मृतिः परः ।।१५।।

स्थेन च **रतिमूत्रकृत् अपानस**हितोऽ**हं**कारः **घ्राणे**न **गंधभु**ग्गुदेन मल**विसर्गकृ**च्च।।८।। एवमन्तःकरणप्राणद्वारा **कर्मज्ञानेन्द्रियै**श्च **पुण्यपापयो**स्तत्फलभूत**सुखदुःखयोः** क्रमेण **कर्तृ**त्वं **भोक्तृत्वं च** क्षुत्पिपासाशीतोष्णादि**द्वन्द्व**धर्म**ताऽपि भौतिके पञ्चके** सूक्ष्मपञ्चभूतजन्ये लिङ्गदेह एव न स्थूले मृतदेहे तथात्वादर्शनात्।।९।। यतो द्वैतधर्मा लिङ्गदेहगा**स्तत्त**स्मात्कारणात्त्वया **लिङ्गदेहतादात्म्या**भिमाना**द्वृथा कर्तृत्वादि अर्जितं** अध्यासेन संपादितं तर्हि तत्कथं नश्येदत आह **हेतुदेहा**त्कारणदेहा**त्परो** यः **स्व**रूपभूत **आत्मा** तस्य **ज्ञानादचिरा**च्छ्रीघ्रं ज्ञानसमकाल एव **ध्रुवा** पुनरावृत्तिरहिता **मुक्तिः** अर्थात्कर्तृत्वादिविनाशश्च।।१०।। कोऽसौ हेतुदेहः उच्यते **स्व**रूपं **दिदृक्षो**रन्तरा**ऽररं** कपाटरूपं य**दज्ञानं** देहद्वयबीजभूतं सर्वज्ञानोपसंहारपूर्वकं बुद्धेः कारणावस्थानरूपं स एव **हेतुः** कारणदेहः, स आत्मेति चेन्न तमोऽभिभूतत्वात्, तस्य **साक्षी** '*साक्षाद्द्रष्टरि संज्ञायाम्* ' त्रिभ्यो देहेभ्यस्तदभिमानिभ्यश्च **परः** स त्वं। स कथंभूतोऽहं **निराकारः स्वात्मा**कार**बुद्धिः** स एव **महाकारण**देहः ब्रह्मानंदवानस्मीति किञ्चिदुर्वरिताहंकारशेषत्वात्। तर्ह्यभावरूपोऽहं न, तस्यापि **साक्षी** स्वयंप्रकाशत्वात्।।११।। **स्थाणुः** कूटस्थः किं परिच्छिन्नोऽहं न **अंतर्बहिर्भास्वान्** अतः प्रत्यगभिन्नः परमात्माऽसि **अदः** मयोक्तं **विद्धि** येन **निराकृति**र्निरभिमान**श्चतुर्देहपर आत्माराम**श्च भविष्यसि।।१२।। ननु यद्भवंतो वदंति विद्ध्यद इति तदनादिकालभ्रमोपहतधीरहं कथं जानीयामिति चेज्जपाकुसुमसान्निध्यात्स्फटिकस्य रञ्जनमिव पञ्चकोशतादात्म्यात्तत्तदाकारभ्रमो मिथ्याभूतः '*अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा* ' इति श्रुत्युक्तप्रकारेण कोशानात्मनः पृथग्विवेचनान्मुञ्जादिषीकामिवात्मानं विद्धीत्युपदेष्टुं कोशान् व्युत्पादयति। **अन्नं** अन्नमयः **असुः** प्राणमयः **हृन्म**नोमयः **धी**र्विज्ञानमयः **अहंकार** आनंदमयः एषां **तादात्म्यतो**ऽहं जन्मादिमान् क्षुत्पिपासावान्संकल्पवान् विज्ञानवान्कर्ता आनंदवान् भोक्तेत्यादि**भ्रमः**। के ते कोशा यैर्भ्रम इत्यत आह **पञ्चीकृतैर्भूतै**रुपलक्षितः **स्थूल**देहोऽन्नमयकोशः १, राजसैः **कर्मेन्द्रियैः** प्राणैश्चोपलक्षित**सूक्ष्म**देहस्तदेकदेशः प्राणमयकोशः २।।१३।। सात्त्विकै**र्धीन्द्रियै**र्ज्ञानेन्द्रियै**श्च**कारान्मनसा धिया च सहितै**र्हेतु**र्विज्ञानमयो **महा**नानंदमयश्च। मनोमयस्य विज्ञानेऽन्तर्भावः स चाग्रे कथ्यते। अथ **तद्विदा** तेषां कोशानां ज्ञानेन तेभ्यो**ऽन्वयव्यतिरेकाभ्यामात्मन्युद्धृते** बुद्ध्याऽसंगत्वेन निष्काशिते **परं ब्रह्मैव शिष्यते**।।१४।। कौ तावन्वयव्यतिरेकौ याभ्यामात्मा पृथक् क्रियते तत्राह। अस्मिन्प्रकरणेऽन्वयव्यतिरेकाभ्यामनुवृत्तिव्यावृत्ती कथ्येते यतोऽन्वय्येवानुमानं न व्यतिरेकि **स्वप्ने उर्वभाने** स्थूलदेहस्याप्रतीतौ **अस्या**परोक्षस्यात्मनः यत्स्वप्नसाक्षित्वेन **भानं** सो**ऽन्वयः** अपरो व्यतिरेकस्तु **प्राग्विस्मृतिः** स्थूलदेहानवभासनं। एवमन्यत्रापि। तथाहि **लिङ्गाभाने** लिङ्गदेहस्याप्रतीतौ यत् **स्वापभानं** स्वप्नसाक्षित्वेन स्फुरणं अस्यात्मन इत्यनुवर्तते

तद्विदोऽसुमनोध्याख्या गुणावस्थाभिदः पृथक् । सुप्त्यभानेऽन्वयो भानं समाधौ प्राग्वदन्यकः ।।१६।।
त्यक्तत्रिदेहसङ्गस्य निष्कल्पस्य सुषुप्तिवत् । स्थितिः परात्परं वस्तु सच्चिच्छर्म निराकृति ।।१७।।
क्ष्माप्कालैर्बीजलीनद्रुर् यथेक्ष्यो जागृतेस्तथा । सुप्त्यवित्स्थजगद्देहौ तत्परत्वाविदः पुनः ।।१८।।
देहान्ते ज्ञस्याहंतास्थ-विश्वाकारोऽनुजन्मदः । अवस्था जागृतिः स्वप्नो निद्रा तुर्या च तुष्टये ।।१९।।
विश्वतेजःप्राज्ञप्रत्यगभिमानिन ईरिताः । दृक्कण्ठहृन्मूर्धसंस्थाः स्थूलसूक्ष्ममुदुन्मुदः ।।२०।।
भोगा रजःसत्त्वतमः-शुद्धसत्त्वगुणाः क्रमात् । वाचोऽत्र वैखरी मध्या पश्यन्ती च परास्त्रिषु ।।२१।।

(मोक्षः) ।। स च स्थूलदेहादिप्रविलापेन तत्प्रकारस्तु ।।

देहः	अवस्था	अभिमानी	स्थानं	आनंदः	भोगः	गुणः	वाचा	देवः	लोकः	मात्रा
स्थूलः	जाग्रत्	विश्वः	नेत्रं	विषयानंदः	स्थूलभोगः	रजः	वैखरी	ब्रह्मा	भूः	अः
सूक्ष्मः	स्वप्नः	तैजसः	कंठः	स्वप्नानंदः	प्रविविक्तभोगः	सत्त्वं	मध्यमा	विष्णुः	भुवः	उः
कारणं	निद्रा	प्राज्ञः	हृदयं	निद्रानंदः	आनंदः	तमः	पश्यंती	रुद्रः	स्वः	मः
महाकारणं	तुर्या	प्रत्यक्	मूर्धा	समाध्यानंदः	परानंदः	शुद्धसत्त्वं	परा	आत्मा	महः	अर्धमात्रा

सो**ऽन्वयः परो** व्यतिरेकस्तु तदा **प्राग्विस्मृतिः** पूर्वदेहतदवस्थानवभासनं।।१५।। ननु कोशोपक्रमे देहान्वयादि प्रकृतासंगमिति चेत् कोशानां देहत्रयान्तःपातित्वात् स्थूलदेह एवान्नमयः सूक्ष्मे च प्राणमनोधीमयाः कारणे च प्रियमोदप्रमोदवृत्तिभिः सत्त्वमानन्दमयः। इष्टवस्तुदर्शनं प्रियं, तल्लाभो मोदस्तदनुभवः प्रमोद इति विवेकः। तर्ह्येकस्मिन् लिङ्गदेहे कथं त्रयाणां समावेशस्तत्राह गुणैरवस्थाभिश्च भिद्यन्त इति **गुणावस्थाभिदः असुमनोध्याख्याः** तेषां विदो ज्ञानात्पृथक्कृता इति शेषः। राजसैः कर्मेन्द्रियप्राणैः प्राणमयः, ज्ञानेन्द्रियमनोधियां सत्त्वगुणत्वे बाह्यान्तरावस्थावत्वाद्द्वौ कोशौ, **समाधौ सुषुप्त्यभाने**ऽप्यस्यात्मनो य**द्भानं** समाधिसाक्षित्वेन स्फुरणं स आत्मनो**ऽन्वयः अन्यकः** व्यतिरेकः प्राग्विस्मृतिः पूर्वदेहतदव-स्थानवभासनं।।१६।। एवमन्वयव्यतिरेकाभ्यां पंचकोशविवेकत**स्त्यक्तत्रिदेहसंगो**ऽभिमानो येन **निर्**गतः **कल्पः**कल्पना यस्य या सुप्ति**वत् स्थितिः** न तु सुषुप्तिः तदेव **परात्परं निराकृ**त्याकाररहितं **सच्चिच्छर्म** सच्चिदानंदं **वस्तु** परं ब्रह्म '*अयमात्मा ब्रह्म* ' इति श्रुतेः।।१७।। **क्ष्मा** भूमिः **आप** उदकं **कालो** ऋतुः '*ऋतुक्षेत्रांबुबीजानां सामग्र्यादङ्कुरोद्भवः* ' **देहांते** तस्या**हंकारस्थित**विश्वाकारो**ऽनु** पश्चा**ज्जन्मदः**। तस्माज्ज्ञानाभ्यासादेव मोक्षः। स च स्थूलदेहादिप्रविलापेन। तत्प्रकारस्तु देहचतुष्टयक्रमेण यथोपन्यस्तं ज्ञात्वा।।१९।।२०।।२१।। ततः **स्थूलः सूक्ष्म**शरीरे **तत्कारण**शरीरे **तन्महाकारणे** चा**नंदमयः स्वस्थो भवति नान्यथा** कर्मादिना।।२२।। **तस्मा**त्प्रविलापा**द्देहत्रये लीने**

त्रिमात्रा ॐकृतेस्त्वर्धा तुर्ये ज्ञात्वैवमादितः । स्थूलः सूक्ष्मे कारणे तत् तन्महाकारणे क्रमात् ।
प्रविलाप्यानन्दमयः स्वस्थो भवति नान्यथा ।।२२।।
तस्माद्देहत्रये लीने धीलयः स समाधिकः । तत्ते परात्परं रूपं निर्विकल्पमवेहि सत् ।।२३।।
घटादिवद्द्योर्जीवस्याविद्योपाधिस्तु तत्क्षये । खस्थद्योवत्परात्मत्वं जीवत्वं लीयतेऽचिरात् ।।२४।।
ज्ञाते क्षराक्षराहंता-परे तत्त्वे स तन्मयः । सृष्टेः प्राङ्निर्विकल्पैका चिद्ब्रह्मास्मीत्यभूत्त्विह ।।२५।।
स्फूर्तिः खे वायुवत्साद्या मायाद्यस्तज्ज्ञ ईश्वरः । तत्र विश्वोद्गमेहाभूत्सान्या मायाथ तत्र तु ।।२६।।
जगत्स्यामिति सङ्कल्पोऽभून्महत्तत्त्वनामकः । विद्याविद्ये उभे माये तज्ज्ञौ सर्वेशजीवकौ ।।२७।।
जीवोऽविद्याऽऽवृतः स्वाज्ञो महतोऽहंकृतिस्त्रिधा । क्रियाज्ञानद्रव्यशक्ति-रजःसत्त्वतमोगुणैः ।।२८।।
प्राणेन्द्रियान्तःकरण-भूतान्यासन्क्रमात्ततः । ततो लोका विराट् तैश्चिदंशात् कार्यक्षमोऽभवत् ।।२९।।
लोकाङ्गस्य रदास्तारा माया हास्यं निशादिने । निमेषोन्मेषौ कटाक्षः सृष्टिः कुक्षिरपांपतिः ।।३०।।
नाड्यो नद्यो द्रुमाः केशा वृष्टी रेतोऽस्थि पर्वतः । विराजः स्थूलदेहोऽयं चराचरजगन्मयः ।।३१।।

पंचवृत्त्याकारबुद्धि**लयः स समाधिः**। **अवेहि** जानीहि।।२३।। **द्यो**राकाशस्य। **तत्क्षये** उपाधिक्षये।।२४।। **क्षरः** भूतानि **अक्षरः** कूटस्थः **अहंता** संघाभिमान एभ्यः **परे तत्त्वे** ज्ञाते सति तज्ज्ञाना**त्स तन्मयः** तदर्थमुपक्रमोपसंहारौ दर्शयति। **चिच्चै**तन्यं सच्छब्दवाच्यं। **इह** चिति **ब्रह्मास्मी**ति **स्फूर्तिः** आकाशे **वायु**रिवा**भूत् सा** सत्त्वोपाधिका**ऽद्या माया** तत्प्रतिबिम्बित**स्तज्ज्ञ ईश्वर** उच्यते **तत्र** तयोर्मध्ये ईक्षणलेशेन **विश्वो**त्पादनेच्छा**ऽभूत्साऽन्या** मलिनसत्त्वा **माया**ऽविद्याख्या **अथ तत्रे**श्वरे।।२५।।२६।। अहं **जगत्स्यामिति** यः **संकल्पः** स **महत्तत्त्वनामकः**। **तज्ज्ञौ** तदुपाधिकौ।।२७।। **अविद्यया**ऽऽवरणशक्त्या **वृतो**ऽतः स्वरूपानभिज्ञोऽभूत्। **महतो** महत्तत्त्वात् **रज**आत्मकः **क्रिया**शक्तिकः **सत्त्वा**त्मको **ज्ञान**शक्तिकः **तम**आत्मको **द्रव्य**शक्तिकः एवं **त्रिधाहं**कारः।।२८।। राजसात्कर्मेन्द्रिय**प्राणाः** सात्त्विकाज्ज्ञा**नेन्द्रियांतःकरण**देवाः तामसात्पंच**भूतानि ततो** भूतेभ्यश्चतुर्दश**लोकास्तै**र्लोकै**र्विराट् चिदंश**प्रवेशा**त्कार्यक्षमोऽभवत्**।।२९।। **लोका अङ्गा**नि यस्य विराजः, नक्षत्राणि दंताः, रात्रिर्दिवसश्च **निमेषोन्मेषौ**, **सृष्टिः कटाक्षः**, समुद्रः **कुक्षिः**।।३०।३१।। दिशः कर्णौ, **वायु**स्त्वक्, **अर्क**श्चक्षुः, वरुणो जिह्वा, नासा**श्विनौ**, इति **ज्ञाने**न्द्रियाणि, अग्निर्वाक्, **इन्द्रः** पाणी, **उपेन्द्रः** पादौ, **मृत्यु**र्गुदं, प्रजापतिर्लिङ्गं इति **कर्मेन्द्रियाणि, हरिरन्तःकरणं**, चंद्रो मनः।।३२।। **ब्रह्मा** बुद्धिः रुद्रोऽहंकारः **नारायण**श्चित्तं इत्यन्तःकरणानि समष्टेः। व्यष्टेस्तु देवताः। अयं **सूक्ष्मदेहः**। **अविद्या कारणं**, माया महाकारणं, **ईश** एव **प्रत्यक्**। पूर्वव**द्व्यतिरेकाद्देहनिरासतः त्वंपद**मिव लुप्तोपमा **तत्पदं अतस्तत्त्वमसि**।।३३।। निरासप्रकारमाह **भूरप्सु** प्रविलाप्य **ता** आपो**ऽप्यग्नौ सो**ऽग्नि**र्वायौ स** वायुः **खे** आकाशे **तत्**खं **द्रव्या**त्मके **तमसि प्रविलापयेत्**। **तत्**तमो **रज**श्च **सत्त्वे** तत्**सत्त्वं तमसि**।।३४।। **तत्**तमो**ऽहंकृतौ सा**ऽहंकृतिः सा **अविद्यायां** प्रविलाप्य।

दिग्वाय्वर्कप्रचेतोऽश्वि-वह्नीन्द्रोपेन्द्रमृत्युकाः । ज्ञानकर्मेन्द्रियाण्यन्तःकरणानि हरिः शशी ।।३२।।

ब्रह्मनारायणेशाश्च सूक्ष्मदेहोऽथ कारणम् । अविद्याद्या महत्प्रत्यगीशो देहनिरासतः ।

तत्पदं व्यतिरेकात्त्वं-पदं तत्त्वमसि ह्यतः ।।३३।।

भूरप्स्वग्नौ ताः स वायौ स खे तत्प्रविलापयेत् । द्रव्ये तमसि तत्सत्त्वे रजः सत्त्वं तमस्यथ ।।३४।।

अहंकृतौ तन्महति साविद्यायां लयो द्वयोः । साद्यायां सा ब्रह्मणीत्थं त्वंपदं व्यतिरेकतः ।।३५।।

व्याख्यारूपैकसद्वस्तु सृष्टेः प्राक् चाधुनापि तत् । त्वं श्रोत्रात्मेन्द्रियातीतमस्यैक्यमनुभूयताम् ।।३६।।

सृष्टेः प्राक् सच्चिदानन्द-रूपोऽद्याहङ्कृतेर्लयात् । प्राग्वदूर्ध्वमपीदृक्त्वं या सृष्ट्यस्तित्वकल्पना ।।३७।।

गवाधाराहङ्कृतेः प्राक्-स्थानाभावान्न साद्य चेत् । तद्वत्क्वास्ति त्वमेकोऽतोऽद्वितीयो ब्रह्म चिन्मयः ।।३८।।

ब्रह्मबुद्ध्या द्वयाभावाद् देह्यहंकृतिसंक्षयात् । शिष्यतेऽत्र निराकारः क्वाख्यारूपात्मकं जगत् ।।३९।।

एवं विराजो देह**द्वययोर्लयः सा**ऽविद्या मायायां **सा** च माया **ब्रह्मणि** प्रविलाप्या। एवं सर्वविलापावधिभूतं ब्रह्मावशिष्यते तदेव तत्पदलक्ष्यं। **इत्थ**ममुनाप्रकारेण देहेन्द्रियप्राणमनोबुद्ध्यहंकारप्रविलापेन प्रलयावधिभूतः प्रत्यगात्माऽवशिष्यते स एव **त्वंपद**लक्ष्यार्थः।।३५।। अनयोरैक्यार्थं महावाक्यमाह **वि**गतनाम**रूप**कं **एकं** सजातीयादिभेदशून्यं **सृष्टेः** पूर्वं य**त्सद्वस्तु तदधुना** स्थितिकालेऽपि **च**कारात्प्रलयेऽपि *'वाचारंभणं विकारो नामधेयं '* *'अतोऽन्यदार्तं '* इति श्रुतेः तदेव तत्पदलक्ष्यं यच्च **श्रोतु**स्तवा**त्मा** देहः **इंद्रियाणि** प्रसिद्धानि उपलक्षणमिदं संघातस्य तान्य**तीतं** प्रत्यक् साक्षिचैतन्यं **त्वं** त्वंपदलक्ष्यं असि। अनयोः सामानाधिकरण्यादखंडैकरसत्वेन तत्त्वमेव त्वमेव तत् एव**मैक्यं** निदिध्यासनादिक्रमेण त्वयाऽपरोक्षत्वे**नानुभूयतां**।।३६।। पूर्वं **सृष्टेस्त्वं सच्चिदानंदरूप** आसीः **अद्याहं**कार**लया**द्विगतोपाधिः **प्राग्व**त्सच्चिदानंदरूपोऽसि। **ऊर्ध्वं** विदेहकैवल्येऽपी**दृक् अतो**ऽस्य**द्वितीयः**। ननु यतोऽन्या सृष्टिर्दृश्यतेऽतः कथमद्वितीयत्वं तत्राह **अहंकारात् प्राग्या सृष्ट्यस्तित्वकल्पना** साऽन्तःकरणप्रेरितेन्द्रियाधारा **साऽद्य** बोधे **स्थानाभावात् न** *'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् '* इति श्रुतेः।।३७।। अस्ति **तद्व**त्पूर्वव**त्क्वास्ति** न क्वापि दीपादिना रज्जुदर्शनात्सर्प इव।।३८।। **ब्रह्मा**काराखंड**बुद्धि**वृत्त्या **निराकार** एव **शिष्यते तत्र** पुनः **क्व** नाम**रूपात्मकं जगत्**।।३९।। भोगकाले कदाचि**द्दृष्टमपि स्त्रग्भोगिव**द्भातु नाम पुनस्तेन **ते ज्ञानदीपाद्भ्रमो न** भविष्यति तर्हि कतिकालं ज्ञानदीपो रक्षणीयो **दृढाभ्यास**पर्यन्तमित्याह **ज्ञान**मिति।।४०।। यथा **स्त्रजि** मालायां **अहेरभावः** भ्रमा**त्प्राक्** ज्ञाना**दूर्ध्वं** च **ब्रह्मणि** जगद्भ्रमाभावः तर्ह्यभाव एव मोक्ष इति चेन्न द्वैतस्यैवाभावो न स्वानुभवस्येत्याहाभावादिति। **मा एहि** मा गच्छ तमभावं जानातीति **तज्ज्ञः** तत्संबुद्धौ।।४१।। यो**ऽयं प्रबोधः** सोऽद्यैव जात इति न किंतु **नित्यो भास्वांश्**च। नित्यश्चेद्वेदः कुतो बोधयत्यत आह **वेदा भ्रान्ता**नां देहात्मदृष्टीनां **हिते**च्छवः बोधकाः न तु मुक्तानाम्। अस्तु नाम तथा। मयाऽधुना निष्कामयोगोऽभ्यसनीयोऽन्यद्वा साधकं। **साध्याभावान्ने**त्याह **साधकेति**। अतः परं न कुरु *'नैव तस्य कृतेनार्थं '* इति स्मृतेः।।४२।। अथ**वा** *'कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् '* इति **भगवद्वाक्यम्**। तर्हि तेन बंधः स्यात् बुद्धिलेपाभावादनहंकाराच्च **तैर**नुष्ठिते**र्न लिप्यसे**। तर्हि निदिध्यासनादि विधेयं। न। देहेऽहंभावरूपविपर्यासाभावा**न्मनो विनाऽपि ज्ञातास्य**तो **ध्यानादेः किं प्रयोजनम्**। न किमपि *'विपर्यस्तो निदिध्यासेन्न*

स्त्रग्भोगिवद्दृष्टमपि ज्ञानदीपान्न ते भ्रमः । ज्ञानं त्यक्त्वा दृढाभ्यासी भ्रमेणापि न युज्यते ।।४०।।

स्त्रज्यह्यभावः प्रागूर्ध्वं तद्वद् ब्रह्मणि चास्य तु । अभावाच्छून्यता मैहि तज्ज्ञ सच्चित्सुखात्मक ।।४१।।

भास्वान्नित्यः प्रबोधोऽयं वेदा भ्रान्तहितैषिणः । साधकान्यद्य कार्याणि साध्याभावान्न कुर्वतः ।।४२।।

भगवत्वाक्यतोऽसक्तः कुरु वा तैर्न लिप्यसे ।मनो विनापि ज्ञातासि ध्यानादेः किं प्रयोजनम् ।।४३।।

अदेहप्राणहृद्धर्मः प्रारब्धाशीः सुखं वस । इदं रहस्यं बोधाख्यं तज्ज्ञो ब्रह्ममयो भवेत् ।।४४।।

इति बोधाख्यं द्वितीयं रहस्यम् ।।

समाप्तोऽयं ग्रन्थः प्रीयतामनेन श्रीदत्तः ।।

इति श्रीमत्परमहंस परिव्रजकाचार्य श्रीवासुदेवानन्दसरस्वती(टेम्बे)स्वामिविरचितं

।। श्रीगुरुचरितं सम्पूर्णम् ।।

ध्यानमविपर्यय ' इत्युक्तेः।।४३।। '*तस्य तावदेव चिरं* ' इति श्रुतेर्यावत्प्रारब्धं देहस्तिष्ठति तावत् वर्णाश्रमादयः, अमुष्याहं पुत्रो भ्रातेत्यादिसंबंधाः, शौक्ल्यकार्श्यादयो देहधर्माः, क्षुत्पिपासादयः प्राणधर्माः, शोकमोहादयः हृद्धर्माः ते न सन्ति यस्य सो**ऽदेहप्राणहृद्धर्मः** स त्वं **प्रारब्धा**तिवाहकः सन्**सुख**मात्मस्वरूपे **वस**। अथार्धेन ग्रंथालंकारः। **बोध** इत्या**ख्या** यस्य तत् रहस्युपनिषद्भागे भवं **रहस्यं** अधिकारिलभ्यं **त**स्य **ज्ञः ब्रह्ममयो भवे**दिति फलं। '*यज्ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति* ' इति श्रुतेः।।४४।। इति द्वितीयं रहस्यं। संपूर्णोऽयं टीकाग्रंथः। प्रीयतामनेन सर्वान्तर्यामी भगवान्श्रीदत्तसद्गुरुः।।

ज्ञानं त्रयोदशाध्यायैः कर्मयोगं च पंचभिः। पंचभिर्भक्तियोगं च कारयामास योगिराट्।।१।।

पाश्चात्यपाथोधितटे नवानां टीका प्रभासेऽभ्युदिताऽखिलानाम्। श्रीद्वारकायां चरितस्य तस्य श्रीसद्गुरोर्वेदनुतस्य तस्य।।२।।

शालिवाहनशके क्ष्माश्विवसुभूमिमिते(१८२१) त्वियं। टीका संपूर्णतां प्राप्ता चातुर्मास्ये ह्यवर्षके।।३।।

।। संवत् १९५६ ।।